| छन्दसां वृत्तिनामानि । | छन्दसां लक्षणानि । | छन्दसामुदाहरणानि । |
|---|---|---|
| अथ दण्डकाः ।<br>सप्तविंशत्यक्षरा वृत्तिः ।<br>चण्डवृष्टिप्रपातः | यदिह नयुगलं ततः सप्तरेफास्तदा चण्ड-<br>वृष्टिप्रपातो भवेद्दण्डकः<br>।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ, | प्रलयघनघटामहारम्भमेघावलीचण्डवृष्टिप्रपाताकुलं गोकुलं<br>सपदि समवलोक्य सव्येन हस्तेन गोवर्द्धनं नाम शैलं<br>दधल्लीलया ।<br>कमलनयन ! रक्ष रक्षेति गर्व्वं त्यजन्मुग्धगोपाङ्गनालिङ्ग-<br>नानन्दितो<br>गलदभिनवधातुधाराविचित्राङ्गरागो मुरारातिरस्तु<br>प्रमोदाय वः ॥ |
| प्रचितकः | प्रचितकसमभिधो धीरधीभिः स्मृतो दण्डको<br>नदयादुत्तरैः सप्तभिर्यैः<br>।।।,।।।,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ | सुरहर ! यदुकुलाम्भोधिचन्द्र ! प्रभो ! देवकीगर्भरत्न !<br>त्रिलोकैकनाथ !<br>प्रचितकपटसुरारिप्रमोहामदन्तावलक्षोमविद्रावण<br>केशरीन्द्र ! ।<br>चरणनखरसुधांशुच्छटोन्मेषनिःशेषितध्यायिचेतो<br>निविष्टान्धकार !<br>प्रणतजनपरितापोग्रदावानलोच्छेदमेघ ! प्रसीद प्रसीद<br>प्रसीद ॥ |
| कुसुमस्तबकम् | सगणः सकलः खलु यत्र भवेत्तमिह प्रवदन्ति<br>बुधाः कुसुमस्तबकम्<br>।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ | विरराज यदीयकरः कनकद्युतिबन्धुरवामदृशः<br>कुचकुड्मलगो<br>भ्रमरप्रकरेण यथावृतमूर्त्तिरशोकलताविलसत्कुसुमस्तबकः ॥<br>स नवीनतमालदलप्रतिमच्छविविभ्रदतीवविलोचनहारिवपु-<br>श्चपलारुचिराम्शुकवल्लिधरो हरिरस्तु मदीयहृदम्बुज-<br>मध्यगतः ॥ |
| मत्तमातङ्गलीलाकरः | यत्र रेफः परं लीलया गुम्फितः स स्मृतो दण्डको<br>मत्तमातङ्गलीलाकरः<br>ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ | हेमगौरं वसानोऽंशुकं शृङ्गशैलासिते वर्त्मनि स्वर्दिशा-<br>मुल्लेपाङ्कितो<br>हारतारांशुवत्सोनभश्चित्रमालाञ्चितो भव्यभूषोज्ज्वलाङ्गः<br>समं सीरिणा ।<br>श्रङ्गनाभास्वरेन्द्रकुन्दाभ देहेन लीलापरिहास-<br>हासोर्म्मिकौतूहलैः<br>कंसरङ्गाद्रिपः पातु वक्त्रपाणिर्गतिक्रीडया मत्तमातङ्ग-<br>लीलाकरः ॥ |
| अष्टाविंशत्यक्षरा वृत्तिः ।<br>अशोकपुष्पमञ्जरी | यत्र दृश्यते गुरोः परो लघुः क्रमात् स उच्यते<br>बुधैरशोकपुष्पमञ्जरीति<br>ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ। | मूर्छितं चारुचम्पकस्रजा सलीलवेष्टनं लसल्लवङ्गचारु-<br>चन्द्रिका कचेषु<br>कर्णयोरशोकपुष्पमञ्जरीवतंसको गलेच कान्तकेशरो-<br>पक्लृप्तदाम ।<br>पुन्नागकेशरादिपुष्परेणुरूषणं तनौ विचित्रमित्युपात्त-<br>वेश एष<br>केशवः पुनातु वः सुपुष्पभूषितः स मूर्त्तिमानिवागतो<br>मधुर्विहर्त्तुमत्र ॥ |
| अनङ्गशेखरः | लघुर्गुरुर्निरन्तरं यदा निवेश्यते तदेव दण्डको<br>भवत्यनङ्गशेखरः<br>।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ | उदेत्यसौ सुधाकरः पुरो विलोकयाद्य राधिके ! विजृम्भ-<br>माणगौरदीधितौ<br>रतिस्वहस्तनिर्म्मितः कलाङ्कुरूहवेन चारुचम्पकैरनङ्ग-<br>शेखरः किसु ।<br>इति प्रमोदकारिणीं प्रियाप्रमोदलक्षणां गिरं समुद्गिर-<br>न्मुरारिरद्भुतां<br>प्रदोषकालसङ्गमोल्लसन्मना मनोज्ञकेलिकौतुकी करोतु वः<br>कृतार्थताम् ॥ |